चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती॥ २४॥

व्याख्या— प्रस्तुतोऽयं श्लोकः अभिज्ञानशाकुन्तलस्य प्रथमाङ्कात् गृहीतोऽस्ति। श्लोकेऽस्मिन् महाकविः भ्रमरस्य चित्रणे नायकस्य प्रतिद्वन्द्वी रूपे विदधाति। राजा दुष्यन्तः सासूयमिव कथयति चलेति। मधुकर! हे भ्रमर! करं-पाणिं, व्याधुन्वत्याः - भ्रमरनिराकरणाय इतस्ततो विलोलयन्त्याः अस्याः शकुन्तलायाः इति शेषः, वेपथुमतीं - त्वद्भयेन आरोपपक्षे कामावेगेन कम्पमानाम्, अतिचपलामिति यावत्, अतएव चलौ - चञ्चलौ, अपाङ्गौ - नेत्रप्रान्तभागौ यस्यास्तथाभूताम्, दृष्टिं - नयनं, बहुशः - वारम्वारं, स्पृशसि - दंशसि इत्यर्थः आरोपपक्षे चुम्बसि, रहस्यं - गोप्यम् आचष्टे आख्याति वेति - रहस्याख्यायी स इव, कर्णान्तिकचरः - श्रवणेन्द्रियसमीपगामी, सन् मृदु - कोमलं मन्दं वा यथास्यात्तथा स्वनसि - शब्दं करोसि, आरोपपक्षे ब्रवीषि, । तथा रतिसर्वस्वम् - रतेः सुरतेच्छायाः, सर्वस्वं - प्रधानकारणं, यद्वा रतौ सर्वस्वमिवादरणीयम्, यद्वा रतेः कामपत्न्याः सर्वस्वं युवजये परमसहायम्, अधरं - दन्तच्छदं, पिबसि - दशसि, आरोपपक्षे चुम्बसि,। अतएव वयम् अर्थादहम्, तत्त्वान्वेषात् - कस्येयं कन्या? का वेयम्? मम परिग्रहक्षमा नवा? इत्यादि - तथ्यानुसन्धानात्, हताः - हतप्रायाः वञ्चिताः इति यावत् - दैवेनेति शेषः। किन्तु त्वं खलु - नूनं, कृती - कृतकर्मा धन्यः इत्यर्थः।

अत्र दृष्टिस्पर्शनम् कुचनाधरपानरूपतथाभूत - कार्येण प्रच्छन्न श्रृंगारि नायक व्यवहार समारोपात् समासोक्तिः।
"वयं तत्त्वान्वेषाद् हताः त्वं खलु कृती" इत्युपमानाधिक्याद् व्यतिरेकः। मधुकर कृतित्वे प्रथम त्रिचरणगत वाक्यार्थानां हेतुत्वेनोपन्यासाद् वाक्यार्थ हेतुकः काव्यलिंगालंकारः। रहस्याख्यायीवेति - क्रियोत्प्रेक्षा। इत्येषामलंकाराणां परस्पर नैरपेक्ष्येण संसृष्टिः।
अत्र शिखरिणी वृत्तम्।

अनुवाद:— ओ भ्रमर! शकुन्तला बार-बार हाथ से हटाती है, फिर भी तू उसके चञ्चल नेत्रों को छूता है, गुप्त भाषाभाषी के समान उसके कानों के समीप जाकर मीठी-मीठी बातें गुनगुनाता है, उसके रतिसर्वस्व अधर का पान करता है। हम इसके तत्त्वान्वेषण में - परिग्रहक्षमा है अथवा नहीं, लगकर असफल रहे और तूने सफलता प्राप्त कर ली।